।। प्रश्नसञ्चयः ।।

# संस्कृतम्

दशमी कक्ष्या

(अक्कादमिक - संस्कृतविद्यालयानां कृते)

## QUESTION POOL

## SANSKRIT

X

(FOR ACADEMIC & ORIENTAL SCHOOLS)

Government of Kerala
Department of Education
2017

*Prepared by*

**State Council of Educational Research and Training (SCERT)**

Vidyabhavan, Poojappura, Thiruvananthapuram Kerala-695 012.

Website: www.scert.kerala.gov.in

e-mail : scertkerala@gmail.com

*Prepared by:*
State Council of Educational
Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12,
Kerala. E-mail:scertkerala@gmail.com

*Type setting by:*
SCERT Computer Lab.

©
Government of Kerala
Education Department
2016

# आमुखम् ।

पठनं प्रवर्तनाधिष्ठितं कर्तुम् अनुयोज्याः सहायकाश्च बहवः प्रश्नाः अस्मिन् पुस्तके प्रदत्ताः। दशम्यां कक्ष्यायां संस्कृतछात्राणां कृते साहाय्यं प्रदातुमुद्दिश्य पुस्तकमिदं सज्जीकृतम्। तदर्थम् अत्र बहुविधाः प्रश्नाः दत्ताः। उत्तरलेखनावसरे के के अंशाः श्रद्धेयाः इत्यपि तत्र तत्र सूचितम्। एतादृशानां प्रश्नानां समाधानार्थं छात्रेभ्यः कक्ष्यासु प्रशिक्षणं दातव्यम्। अनुयोज्यानि पठनप्रवर्तनानि कक्ष्यासु चालनीयानि। नूतनप्रश्नानां निर्माणं कृत्वा तानुपयुज्य परीक्षाम् अभिमुखीकर्तुं छात्रेभ्यः प्रशिक्षणं च देयम्।

प्रश्नसञ्चयमिदं सप्रयोजनं कर्तुं भवदीयानामपि निर्देशान् सादरं प्रार्थये।

भवदीयः,

**डा.जे.प्रसादः**

**निदेशकः**

***राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,***

***केरलम्।***

# विषयानुक्रमणिका


| क्रमसंख्या | विषयः | पुटसंख्या |
|---|---|---|
| १ | एककम् -१ जीवनम् | ५-१४ |
| २ | एककम् २ पैतृकम् | १५-२१ |
| ३ | एककम् ३ साहिती | २२-२८ |
| ४ | एककम् ४ संस्कृतिः | २९-३३ |
| ५ | मातृकाप्रश्नपत्रम् | ३४-५२ |
| ६ | पादवार्षिकप्रश्नपत्रम् | ५३-५६ |
| ७ | अर्धवार्षिकप्रश्नपत्रम् | ५७-६४ |

# एककम्

१

# जीवनम्

## पाठाः

१. आयुरारोग्यसौख्यम् (सुभाषितानि) ।

२. दीनवत्सला जननी (कथा) ।

३. मधुमान् नो वनस्पतिः (विवरणम्) ।

**पठनाधिगमाः :-**

- शतृ-शानजन्तरूपाणि विविच्य लिखति।
- औषधसस्यानामुपयोगानुसारं पट्टिकां रचयति।
- सुभाषितानामाशयं ज्ञात्वा लिखति।

प्रश्नः - १

**यथोचितं योजयत ।**

क) चरकसंहिता - सुरपालः ।

ख) ऋषभः - शानजन्तम् ।

ग) वृक्षायुर्वेदः - बलीवर्दः ।

घ) नुद्यमानः - चरकः ।

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा यथोचितं योजयति ।

**चिन्ताशेषयः :-**

आशयग्रहणं विवेचनं च ।

**समयः :-** ५ निमेषाः ।

**अङ्काः :-** ४

**मूल्यनिर्णयसूचकः :-**

» उचितयोजनाय एकोऽङ्कः ।

**उत्तरम् :-**

क) चरकसंहिता - चरकः ।

ख) ऋषभः - बलीवर्दः ।

ग) वृक्षायुर्वेदः - सुरपालः ।

घ) नुद्यमानः - शानजन्तम् ।

***मातृकाप्रश्नः :-***

अ) पनसः - सुरभिः ।

आ) महाभारतम् - ऋग्वेदः ।

इ) धेनोः माता - व्यासः ।

ई) मधुसूक्तम् - वनस्पतिः ।

प्रश्नः - २

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१) सुखदुःखयोः कर्ता कः?

(मनः, वाक्, आत्मा)

२) किं गणे नान्तर्भवति ?

(पचन्, वसन्, आसन्)

३) अस् धातोः लङि रूपं किम्?

(अस्तु, आसीत्, अस्ति)

४) 'शङ्करदिग्विजयम्' कस्मिन् काव्यविभागे अन्तर्भवति?

(चरित्रकाव्ये, महाकाव्ये, स्तोत्रकाव्ये)

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा उचितपदं चिनोति।

**चिन्ताशेषयः :-**

आशयावगमनं, विवेचनं, निर्धारणं च ।

**समयः** :- ५ निमेषाः।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

उचितस्य उत्तरस्य कृते एकः अङ्कः।

***उत्तरम् :-***

१) आत्मा।

२) आसन्।

३) आसीत्।

४) महाकाव्ये।

**मातृकाप्रश्नाः :-**

१) द्रुमः इत्यर्थकं पदं चित्वा लिखत।

(पुत्रः, सुरः, वृक्षः)

२) 'दशपुत्रसमो द्रुमः' । इदं वाक्यं कस्मात् ग्रन्थात् उद्धृतम् ?

(बृहत्कथायाः, वृक्षायुर्वेदात्, महाभारतात्)

३) फलपाकान्तं सस्यविभागः कः ?

(वनस्पतिः, वृक्षः, ओषधिः )

४) अद्वैतचिन्ताप्रतिष्ठापकः कः ?

(शङ्कराचार्यः, विवेकानन्दस्वामी, मध्वाचार्यः )

**प्रश्नः - ३**

**पट्टिकां पूरयत ।**

| लङ् | लट् | लोट् |
|---|---|---|
| आसीत् | —— | अस्तु |
| —— | भवति | भवतु |
| अलिखत् | लिखति | —— |

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा उचितं क्रियापदं लिखति ।

**चिन्ताशेषयः :-**

✎ विवेचनम् आशयावगमनं च ।

**समयः** :- ५ निमेषाः।

**अङ्कः** :- ३

**मूल्यनिर्णयसूचकः :-**

» उचितस्य एकैकस्य उत्तरस्य कृते एकः अङ्कः।

उत्तरम् :-

| लङ् | लट् | लोट् |
|---|---|---|
| आसीत् | अस्ति | अस्तु । |
| अभवत् | भवति | भवतु । |
| अलिखत् | लिखति | लिखतु । |

मातृकाप्रश्नाः :-

अ) वृक्षः, वनस्पतिः, वीरुत्, ओषधिः इति क्रमेण सस्यानां पट्टिकां लिखत।

(कदली, पनसः, द्राक्षा, आम्रः, नालिकेरः, कूश्माण्डः, गोधूमः, उदुम्बरः)

आ) शतृ - शानजन्तरूपाणि विविच्य पट्टिकां रचयत।

(जल्पमानः, प्रेरयन्, गम्यमानः, ताडयन्, नुद्यमानः, पठन्)

प्रश्नः - ४

**उदाहरणानुसारं रिक्तांशान् पूरयत।**

उदा - देहः अस्य अस्तीति - देही ।

क) ______________ - गुणी।

**पठनाधिगमः :-**

- उदाहरणानुसारं एकपदं विग्रहं च लिखति।

**चिन्ताशेषयः :-**

- अपग्रथनं प्रयोगः च ।

**समयः** :- ५ निमेषाः।

**अङ्कः** :- १

**मूल्यनिर्णयसूचकः :-**

- मातृकानुसारम् उचितोत्तरपूरणाय एकोऽङ्कः।

उत्तरम् :-

गुणः अस्य अस्तीति - गुणी।

मातृकाप्रश्नः :-

उदा - धनेन हीनः - धनहीनः।

अ) ———— - ज्ञानहीनः।

प्रश्नः - ५

**'मानवः शरीरेण यत् कर्म करोति तस्य कर्मणः फलं स्वशीरीरेणैव अनुभूयते' इति आशययुक्तं श्लोकं चित्वा लिखत।**

क) शरीरमेवायतनं सुखस्य
दुःखस्य चाप्यायतनं शरीरम्।
यद्यच्छरीरेण करोति कर्म
तेनैव देही समुपाश्नुते तत् ।।

ख) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।।

पठनाधिगमः :-

♣ आशयं प्रत्यभिजानाति ।

चिन्ताशेषयः :-

✎ आशयावगमनं विवेचनं च ।

समयः :- ५ निमेषाः ।

अङ्कौ :- २

**मूल्यनिर्णयसूचकः :-**

- उचिताशययुक्तस्य श्लोकस्य कृते अङ्कद्वयम् ।

**उत्तरम् :-**

क) शरीरमेवायतनं सुखस्य
दुःखस्य चाप्यायतनं शरीरम्।
यद्यच्छरीरेण करोति कर्म
तेनैव देही समुपाश्नुते तत् ।।

**प्रश्नः -६**

**श्लोकस्य आशयं सूचनानुसारं लिखत ।**

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये।।

**सूचनाः** - व्यायामः —— आरोग्याय —— अत्युत्तमं —— वैद्यश्रेष्ठौ—— ये जनाः —— अनुशीलयन्ति —— अन्यस्य —— आवश्यकता —— ।

**पठनाधिगमः :-**

♣ आशयं अवगच्छति।

**चिन्ताशेषयः :-**

आशयावगमनं प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्काः** :- ३

**मूल्यनिर्णयसूचकाः :-**

* सूचनानुसारम् आशयस्वीकाराय एकोऽङ्कः ।
* वाक्यस्य पूर्णतायै एकोऽङ्कः ।
* भाषाशुद्ध्यै एकोऽङ्कः ।

उत्तरम् :-

व्यायामः आहारमितत्वं च आरोग्याय अत्युत्तमं भवति। तौ अश्विनीकुमारकल्पौ वैद्यश्रेष्ठौ भवतः। ये जनाः एतत् द्वयं अनुशीलयन्ति तेषां कृते अन्यस्य वैद्यस्य आवश्यकता नास्ति ।

प्रश्नः - ७

**सन्दर्भमिदं पठित्वा सुरभेः इन्द्रस्य च सम्भाषणं संभाव्य लिखत ।**

कृषकेण ताडितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यां अश्रूणि प्रवहन्ति स्म। सुरभेः इमाम् अवस्थां दृष्ट्वा देवेन्द्रः कारणमपृच्छत्। तस्याः पुत्रः दीनः इति जानन्नपि कृषकः तं ताडयति इति सा अवदत्। 'गच्छ वत्से! सर्वं भद्रं जायेत'। इति इन्द्रः समाश्वासवचनम् अवदत्।

इन्द्रः - मातः! किमर्थं रोदिषि?

सुरभिः - मम .............. दैन्यतां दृष्ट्वा रोदिमि।

इन्द्रः - पुत्रस्य किं अभवत् ?

सुरभिः - .................. तं ताडयति।

इन्द्रः - अनेकाः पुत्राः भवत्याः अस्ति खलु ।

सुरभिः - .................. प्रति मातुः स्नेहः अधिकः भवति।

इन्द्रः - गच्छ वत्से ! सर्वं भद्रं जायेत।

सुरभिः - ....................... ।

पठनाधिगमः :-

♣ गद्यांशं पठित्वा आशयं स्वांशीकृत्य संभाषणं रचयति।

चिन्ताशेषयः :-

आशयावगमनं प्रयोगः च ।

समयः :- १० निमेषाः ।

अङ्काः :- ४

मूल्यनिर्णयसूचकः :-

» उचितस्य एकैकस्य सम्भाषणपूरणाय एकैकोऽङ्कः ।

प्रश्नः - ८

**खण्डिकां पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

आयुर्वेदाचार्यः इति प्रसिद्धः भवति चरकः। बौद्धराजस्य कनिष्कस्य आस्थानवैद्यश्चासीत् अयं महाशयः । आर्जितं वैद्यज्ञानम् अष्टधा विभज्य अष्टाङ्गायुर्वेदः इति नाम्ना क्रोडीकृतवान् । अनेन विरचिता चरकसंहिता आयुर्वेदस्य प्रामाणिकग्रन्थः भवति। ग्रन्थोऽयं चीनि - अरबिक् - आङ्गलभाषाभिः अनूदितः भवति।

१) चरकः कस्य आस्थानवैद्यः आसीत् ?

२) आयुर्वेदस्य प्रामाणिकः ग्रन्थः कः?

३) खण्डिकातः ल्यबन्तमव्ययं चित्वा लिखत ।

४) विवर्तनम् इति आशययुक्तं पदं खण्डिकातः चित्वा लिखत ।

**पठनाधिगमः :-**

♣ गद्यांशं पठित्वा आशयम् अवगच्छति।

**चिन्ताशेषयः :-**

✎ अपग्रथनम्, विवेचनं, प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

➤ समुचितस्य उत्तरस्य कृते एकैकोऽङ्कः ।

**उत्तरम् :-**

१) चरकः बौद्धराजस्य कनिष्कस्य आस्थानवैद्यः आसीत् ।

२) आयुर्वेदस्य प्रामाणिकः ग्रन्थः चरकसंहिता भवति।

३) विभज्य।

४) अनूदितः।

प्रश्नः - ९

**प्रादेशिकभाषायां विवर्तयत ।**

महाकवेः श्रीमन्नारायणभट्टपादस्य नारायणीयं श्रीमद्भागवतस्य सारभूतं स्तोत्रकाव्यं भवति। वातरोगेण पीडितः अयं कविः नारायणीयरचनया रोगविमुक्तिं प्राप इति कथा श्रूयते। अस्मिन् काव्ये सहस्राधिकश्लोकाः सन्ति। नारायणीये श्रीकृष्णस्य बाललीला सुललितपदैः भक्तिभावेन च वर्ण्यते। संस्कृतभाषायाः पोषणे मेल्पत्तूर् नारायणभट्टपादस्य योगदानं महदेव।

**पठनाधिगमः :-**

- आशयं ज्ञात्वा भाषान्तरीकरणं करोति।

**चिन्ताशेषयः :-**

- आशयावगमनम्, अपग्रथनं, प्रयोगं च ।

**समयः** :- १५ निमेषाः।

**अङ्काः** :- ५

**मूल्यनिर्णयसूचकाः :-**

- एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

# एककम्

# २

# पैतृकम्

**पाठाः**

४. कनकाधारास्तवम् (काव्यम्) ।

५. जयन्ति ते सुकृतिनः (जीवनचरितम्) ।

६. रागसुधारसः (विवरणम्)।

**पठनाधिगमाः :-**

- सूचनानुसारं जीवनचरितं निर्माति ।
- काव्यभागं सम्भाषणरूपेण लिखति।
- कृतिं - कर्तारं - विभागं च परिचिनोति ।

प्रश्नः - १

**यथोचितं योजयत ।**

अ) कनकधारास्तवम् - ब्रह्मचारी।

आ) शङ्करदिग्विजयम् - श्रीशङ्कराचार्यः।

इ) आमलकम् - माधवविद्यारण्यस्वामी।

ई) वटुः - धात्रीफलम्।

**पठनाधिगमः :-**

♣ आशयमवगम्य यथोचितं योजयति।

**चिन्ताशेषयः :-**

✎ आशयग्रहणं, विवेचनं च।

**समयः** :- ५ निमेषाः।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः**

» उचितयोजनाय एकोऽङ्कः।

**उत्तरम्** :-

अ) कनकधारास्तवम् - श्रीशङ्कराचार्यः ।

आ) शङ्करदिग्विजयम् - माधवविद्यारण्यस्वामी।

इ) आमलकम् - धात्रीफलम्।

ई) वटुः - ब्रह्मचारी।

***मातृकाप्रश्नाः :-***

अ) बालगङ्गाधरतिलकः - कीर्तनम्।

आ) डा. एस् राधाकृष्णः - केरलीयसंगीतज्ञः।

इ) सामजवरगमना - गीतारहस्यम्।

ई) षट्कालगोविन्दमारार् - वेदान्तस्य धार्मिकता।

प्रश्नः - २

**सूचनानुसारं जीवनचरितं लिखत ।**

| | | |
|---|---|---|
| नाम | - | भीमराव् राम्जि अम्बेड्कर्। |
| जन्म | - | १४ अप्रैल् १८९१ |
| पितरौ | - | राम्जी सक्पालः, भीमाबायी च। |
| प्रशस्तिः | - | भरणघटनाशिल्पिः । |
| पुरस्कारः | - | भारतरत्नम्। |

**पठनाधिगमः** :-

♣ सूचनानुसारं जीवनचरितं निर्माति।

**चिन्ताशेषयः** :-

✎ आशयावगमनं, प्रयोगः च।

**समयः** :- १० निमेषाः

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकाः** :-

* सूचनानुसारं आशयाविष्करणे अङ्कद्वयम्।
* जीवनचरितस्य घटनायै एकोऽङ्कः।
* भाषाशुद्ध्यै एकोऽङ्कः।

प्रश्नः - ३

**'दारिद्र्यात् भैक्ष्यमपि दातुमसमर्थायाः जीवितं निरर्थकमेव।'** इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत।

क) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम्।।

ख) तमवोचत तत्र सादरं
वटुवर्य गृहिणः कुटुम्बिनी।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते।।

**पठनाधिगमः** :-

- आशयं प्रत्यभिजानाति।

**चिन्ताशेषयः** :-

- आशयावगमनं, विवेचनं च।

**समयः** :- ५ निमेषाः।

**अङ्कौ** :- २

**मूल्यनिर्णयसूचकः** :-

- उचिताशययुक्तस्य श्लोकस्य कृते अङ्कद्वयम्।

**उत्तरम्** :-

क) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम्।।

**प्रश्नः - ४**

**सम्भाषणांशान् पूरयत।**

श्रीशङ्करः - भवति! भिक्षां देहि।

ब्राह्मणपत्नी - अतितेजस्वी बालः, कोऽयम्? वत्स ! ——— आगतवान्?

श्रीशङ्करः - मातः ! शङ्करोऽहं समीपस्थान् गुरुकुलात् आगतवान्। भिक्षार्थम् आगतवान् अस्मि।

ब्राह्मणपत्नी - भिक्षार्थम् आगतवान् वा? दारिद्र्यात् भैक्ष्यमपि दातुमसमर्थायाः
मम जीवितं ———— भवति।

श्रीशङ्करः - चिन्तया अलम् । मातः।

ब्राह्मणपत्नी - वत्स ! अत्र केवलं ———— एव अस्ति।

श्रीशङ्करः - शुष्कम् आमलकम् वा? कृपया ददातु ।

ब्राह्मणपत्नी - ———— पुत्र ।

श्रीशङ्करः - धन्यवादः । भवत्याः दारिद्र्यं निवारयितुं अहम् ईश्वरं प्रार्थयामि ।

**पठनाधिगमः** :-

♣ उचितपदेन संभाषणं पूरयति।

**चिन्ताशेषयः** :-

✍ आशयावगमनं प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्काः** :- ४

**मूल्यनिर्णयसूचकः** :-

» उचितस्य एकैकस्य संम्भाषणपूरणाय एकैकोऽङ्कः ।

**प्रश्नः - ५**

**अधोदत्तं श्लोकं पठित्वा सूचनाः उपयुज्य गद्यक्रमं लिखत ।**

स मुनिर्मुरभित्कुटुम्बिनीं
पदचित्रैर्नवनीतकोमलैः।
मधुरैरुपतस्थिवांस्तवै-
र्द्विजदारिद्र्यदशानिवृत्तये।।

**सूचनाः** - सः मुनिः — नवनीतकोमलैः —— मधुरैः स्तवैः —— उपतस्थिवान्।

**पठनाधिगमः** :-

♣ श्लोकं पठित्वा गद्यक्रमं लिखति ।

**चिन्ताशेषयः :-**

आशयावगमनं प्रयोगः च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः :-**

- सूचनानुसारं उचितरीत्या गद्यक्रमं लिखति चेत् द्वौ अङ्कौ ।

**उत्तरम् :-**

सः मुनिः मुरभित्कुटुम्बिनीं नवनीतकोमलैः पदचित्रैः मधुरैः स्तवैः द्विजदारिद्र्यदशानिवृत्तये उपतस्थिवान् ।

**प्रश्नः - ६**

**अधोदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनताया हृदयं च विस्मयैः।।

१) अस्मिन् श्लोके क्रियापदं किम् ?

२) का तोषिता अभवत् ?

३) कस्याः हृदयं विस्मयैः अपूरयत् ?

४) परितः इति पदस्य समानार्थकं पदं श्लोकात् चित्वा लिखत ।

**पठनाधिगमः**

- आशयं गृहीत्वा प्रश्नानाम् उत्तराणि लिखति ।

**चिन्ताशेषयः :-**

आशयावगमनं प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

- समुचितस्य उत्तरस्य कृते एकैकोऽङ्कः।

**उत्तरम् :-**

१) अपूरयत् ।

२) कमला तोषिता अभवत् ।

३) जनतायाः हृदयं विस्मयैः अपूरयत् ।

४) समन्ततः ।

**प्रश्नः - ७**

**प्रादेशिकभाषायां विवर्तयत ।**

भारतस्य प्रमुखसङ्गीतज्ञेषु अन्यतमः भवति डा. के. जे. येशुदासः। अयं कर्णाटकसङ्गीतस्य मधुरकण्ठः गायकः। सः अनेकासु भारतीयभाषासु चलच्चित्रगीतानि अगायत्। केरलराज्यस्य कोच्चिमण्डले अस्य जननम् अभवत्। चेम्पैवैद्यनाथभागवतस्य प्रमुखशिष्यः भवति गानगन्धर्वः येशुदासः ।

**पठनाधिगमः :-**

- आशयं ज्ञात्वा भाषान्तरीकरणं करोति।

**चिन्ताशेषयः :-**

- आशयावगमनं, अपग्रथनं, प्रयोगं च ।

**समयः** :- १५ निमेषाः ।

**अङ्काः** :- ५

**मूल्यनिर्णयसूचकाः :-**

- एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

एककम्

३

# साहिती

**पाठाः**

७. काव्यमुक्तावलिः (काव्यम्) ।

८. विगतानुशयः । (नाटकम्) ।

**पठनाधिगमाः :-**

- महाकवीनां कृतीनाञ्च पट्टिकां रचयति ।
- कथापात्राणां स्वभावनिरूपणं रचयति।
- सूचनानुसारं टिप्पणीं लिखति।
- अव्ययपदानां पट्टिकां करोति।

प्रश्नः - १

**यथोचितं योजयत ।**

क) उपमा - विद्वदौषधम्।

ख) अर्थगौरवम् - कालिदासः ।

ग) पदलालित्यम् - भारविः।

घ) नैषधम् - दण्डिः ।

**पठनाधिगमः :-**

- आशयं ज्ञात्वा यथोचितं योजयति।

**चिन्ताशेषयः :-**

- आशयग्रहणं विवेचनं च ।

**समयः** :- ५ निमेषाः ।

**अङ्काः** :- ४

**मूल्यनिर्णयसूचकाः :-**

- उचितयोजनाय एकः अङ्कः ।

***उत्तरम्* :-**

क) उपमा - कालिदासः।

ख) अर्थगौरवम् - भारविः।

ग) पदलालित्यम् - दण्डिः ।

घ) नैषधम् - विद्वदौषधम्।

***मातृकाप्रश्नः* :-**

नलदमयन्ती - दिलीपः ।

अभिज्ञानशाकुन्तलम् - माघः ।

रघुवंशराजः - कालिदासः।

गुणत्रययुक्तः कविः - नैषधीयचरितम्।

प्रश्नः - २

**अधोदत्तश्लोकस्य गद्यक्रमं पूरयत ।**

वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम्।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य? ।।

**सूचनाः** - सः ——— यत्समक्षं वह्नौ ——— मां ————— अहासीः । तत् ———
कुलस्य ——— ——— ? तत् त्वया ——— वाच्यः ।

**पठनाधिगमः :-**

♣ श्लोकं पठित्वा गद्यक्रमं लिखति ।

**चिन्ताशेषयः :-**

आशयावगमनं प्रयोगः च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः :-**

सूचनानुसारं उचितरीत्या गद्यक्रमं लिखति चेत् द्वौ अङ्कौ ।

**उत्तरम् :-**

सः राजा यत् समक्षं वह्नौ विशुद्धामपि मां लोकवादश्रवणाद् अहासीः तत् श्रुतस्य कुलस्य सदृशम् किम्? तत् त्वया मद्वचनात् वाच्यः ।

प्रश्नः - ३

क्त्वान्त - ल्यबन्त - तुमुन्नन्तरूपाणि विविच्य पट्टिकां लिखत ।

(कृत्वा, निलीय, दृष्ट्वा , श्रोतुम्, उत्थाय, गन्तुम्)

**पठनाधिगमः :-**

♣ अव्ययपदानि प्रत्यभिज्ञाय लिखति ।

**चिन्ताशेषयः** :-

✍ विवेचनम् आशयावगमनं च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- ३

**मूल्यनिर्णयसूचकः** :-

» उचितरीत्या अव्ययानां पट्टिकां लिखति चेत् पूर्णाङ्कः।

**उत्तरम्** :-

क्त्वान्तम् - कृत्वा, दृष्ट्वा । तुमुन्नन्तम् - गन्तुम्, श्रोतुम्। ल्यबन्तम् - निलीय, उत्थाय ।

**प्रश्नः - ४**

यथोचितं पट्टिकां पूरयत ।

| कृतिः | विभागः | कर्ता |
|---|---|---|
| कुमारसम्भवम् | ________ | कालिदासः |
| ________ | इतिहासः | वाल्मीकिः |
| शिशुपालवधम् | महाकाव्यम् | ________ |

**पठनाधिगमः** :-

♣ काव्यान् कर्तॄन् च प्रत्यभिजानाति।

**चिन्ताशेषयः** :-

✍ विवेचनम् आशयावगमनं च ।

**समयः** :- ५ निमेषाः।

**अङ्कः** :- ३

**मूल्यनिर्णयसूचकाः** :-

» उचितस्य एकैकस्य उत्तरस्य कृते एकः अङ्कः ।

उत्तरम् :-

| कृतिः | विभागः | कर्ता |
|---|---|---|
| कुमारसम्भवम् | महाकाव्यम् | कालिदासः । |
| रामायणम् | इतिहासः | वाल्मीकिः । |
| शिशुपालवधम् | महाकाव्यम् | माघः । |

**प्रश्नः - ५**

**सूचनानुसारं शकुन्तलायाः स्वभावनिरूपणं लिखत ।**

**सूचनाः** - अभिज्ञानशाकुन्तलं नाटकम् - कण्वमहर्षिः - प्रकृतिनन्दिनी - दुष्यन्तं प्रति स्नेहः - मुग्धनायिका ।

**पठनाधिगमः** :-

♣ नायिकाकाथापात्रस्य स्वभावं निरूपयति।

**चिन्ताशेषयः** :-

✎ आशयावगमनं प्रयोगः च ।

**समयः** :- १५ निमेषाः ।

**अङ्कः** :- ५

**मूल्यनिर्णयसूचकाः** :-

- सूचनानुसारं आशयाविष्करणाय अङ्कद्वयम् ।
- भाषाशुद्ध्यै एकोऽङ्कः ।
- वाक्यपूर्णतायै अङ्कद्वयम् ।

**प्रश्नः - ६**

**उदाहरणानुसारं वाक्यं परिवर्तयत ।**

उदा - वसन्तागमनं भवति । कोकिलः कूजति।

यदा वसन्तागमनं भवति तदा कोकिलः कूजति।

अ) मम माता अनुमतिं दास्यति । अहं नाटकं द्रष्टुं गमिष्यामि।

पठनाधिगमः :-

♣ उदाहरणं दृष्ट्वा वाक्यं परिवर्तयति।

चिन्ताशेषयः :-

✎ प्रयोगः ।

समयः :- ३ निमेषाः ।

अङ्कः :- २

मूल्यनिर्णयसूचकः :-

» उचितरीत्या वाक्यं परिवर्तयति चेत् अङ्कद्वयम् ।

*उत्तरम्* :-

यदा मम माता अनुमतिं दास्यति तदा अहं नाटकं द्रष्टुं गमिष्यामि।

**प्रश्नः - ७**

**खण्डिकां पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

प्रसिद्धसंस्कृतनाटककारेषु अन्यतमः भवति शूद्रकः । अस्य प्रसिद्धनाटकं भवति मृच्छकटिकम्। नाटकेऽस्मिन् चारुदत्तवसन्तसेनयोः अनुपमप्रणयकथायाः सुन्दरं दृश्यं द्रष्टुं शक्यते।अत्र मुख्यरसः शृङ्गारः भवति। शूद्रकस्य शैली अतीवसरला दीर्घसमासरहितः च आसीत्।

१) मृच्छकटिकं नाम नाटकस्य कर्ता कः?

२) कयोः प्रणयकथा नाटकेऽस्मिन् वर्ण्यते?

३) अधोरेखाङ्कितस्य पदस्य पदच्छेदं लिखत।

४) नाटकस्य मुख्यरसः कः?

पठनाधिगमः :-

♣ गद्यांशं पठित्वा आशयम् अवगच्छति।

चिन्ताशेषयः :-

✎ अपग्रथनं, विवेचनं, प्रयोगः च ।

समयः :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

- समुचितस्य उत्तरस्य कृते एकैकोऽङ्कः ।

**उत्तरम् :-**

१) मृच्छकटिकं नाम नाटकस्य कर्ता शूद्रकः भवति ।

२) चारुदत्तवसन्तसेनयोः अनुपमप्रणयकथा नाटकेऽस्मिन् वर्ण्यते।

३) नाटके + अस्मिन्।

४) नाटकस्य मुख्यरसः शृङ्गारः।

**प्रश्नः - ८**

**प्रादेशिकभाषायां विवर्तयत।**

युनेस्कोपुरस्कारेण बहुमानितः महाशिवमन्दिरं भवति श्रीवटक्कुंनाथमन्दिरम्। केरलराज्यस्य सांस्कारिकनगर्याः तृश्शिवपेरूरस्य मध्यभागे भवति इदं मन्दिरम्। दक्षिणकैलासं इति नाम्ना विख्यातं भवति इदं मन्दिरम्। अस्मिन् मन्दिरे प्राचीनशिल्पकलायाः वैदग्ध्यं द्रष्टुं शक्यते। देशविदेशेषु च प्रचुरप्रचारं प्राप्तं 'तृश्शूर्पूरम्' अत्र प्रचलति।

**पठनाधिगमः :-**

- आशयं ज्ञात्वा भाषान्तरीकरोति।

**चिन्ताशेषयः :-**

- आशयावगमनं, अपग्रथनं, प्रयोगं च।

**समयः** :- १५ निमेषाः ।

**अङ्काः** :- ५

**मूल्यनिर्णयसूचकः :-**

- एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

एककम्

४

# ।। संस्कृतिः ।।

**पाठाः**

९. ईशोपदेशः (काव्यम्)।

१०. किमसौ न भयङ्करः ? (कथा) ।

११. प्राप्य वरान् निबोधत (उपनिषद्) ।

**पठनाधिगमौ :-**

- केरलीयसंस्कृतमहाकाव्यानां पट्टिकां करोति।
- श्लोकानाम् आशयं गद्यरूपेण लिखति।

प्रश्नः - १

**यथोचितं योजत ।**

क) ईशोपदेशः - नचिकेतः ।
ख) जातककथा - उत्तिष्ठत जाग्रत ।
ग) वाजश्रवः - गिरिप्रभाषणम् ।
घ) कठोपनिषद् - गौतमबुद्धः ।

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा यथोचितं योजयति।

**चिन्ताशेषयः :-**

आशयग्रहणं, विवेचनं च ।

**समयः :-** ५ निमेषाः ।

**अङ्काः :-** ४

**मूल्यनिर्णयसूचकः :-**

▸▸ उचितयोजनाय एकोऽङ्कः।

**उत्तरम् :-**

क) ईशोपदेशः - गिरिप्रभाषणम् ।
ख) जातककथा - गौतमबुद्धः ।
ग) वाजश्रवः - नचिकेतः ।
घ) कठोपनिषद् - उत्तिष्ठत जाग्रत ।

प्रश्नः - २

**' दक्षिणहस्तेन कृतं भिक्षादानं वामहस्तः मा जानातु '** इत्याशययुक्तं श्लोकं चित्वा लिखत ।

क) भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी।।

ख) यदा पुनस्त्वं भजनं करोषि
तदा समो मा भव दाम्भिकैस्त्वम् ।
परावलोकाय हि ये भजन्ति
समाजगेहे च चतुष्पथे च ।।

**पठनाधिगमः** :-

♣ आशयं प्रत्यभिजानाति।

**चिन्ताशेषयः** :-

आशयावगमनं, विवेचनं च।

**समयः** :- ५ निमेषाः

**अङ्कौ** :- २

**मूल्यनिर्णयसूचकः** :-

» उचिताशययुक्तस्य श्लोकस्य कृते अङ्कद्वयम् ।

**उत्तरम्** :-

क) भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी।।

**प्रश्नः - ३**

**सम्भाषणांशान् पूरयत।**

शृगालः - भक्षितुम् अजमांसं रुचिकरमासीत्।
शृगालभार्या - श्वः अपि अजां गृहीत्वा भक्षणीयम् ।
शृगालः - ____________।
शृगालभार्या - कः उपायः?
शृगालः - मृतोऽहम् इति विश्वासं जनयतु।
शृगालभार्या - अजा बुद्धिमती भवति।

शृगालः - ____________ ?

शृगालभार्या - बुद्धिवैभवेन सा सर्वदा रक्षां प्राप।

शृगालः - ____________ ।

शृगालभार्या - आम् । तव निर्देशानुसारम् अगच्छम्।

शृगालः - __________ ।

शृगालभार्या - अहमेकं श्रमं करिष्यामि।

**पठनाधिगमः :-**

♣ उचितपदेन संभाषणं पूरयति।

**चिन्ताशेषयः :-**

✎ आशयावगमनं, प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्काः** :- ४

**मूल्यनिर्णयसूचकः :-**

» उचितस्य एकैकस्य संम्भाषणपूरणस्य कृते एकैकोऽङ्कः ।

**प्रश्नः - ४**

**सूचनानुसारं विद्यायाः महत्वमधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः** - अज्ञानान्धकारे स्थिताः - पण्डितमन्याः - अज्ञानिनः निरङ्कुशाः - इन्द्रियनिग्रहणक्षमता - ज्ञानसम्पादनार्थं श्रेष्ठजनानां समीपगमनम् ।

**पठनाधिगमः :-**

♣ सूचनान् उपयुज्य लघुटिप्पणीं रचयति।

**चिन्ताशेषयः :-**

✎ आशयावगमनं प्रयोगः च।

**समयः** :- १५ निमेषाः ।

**अङ्कः** :- ५

**मूल्यनिर्णयसूचकाः :-**

- सूचनानुसारं आशयाविष्करणाय अङ्कद्वयम् ।
- भाषाशुद्ध्यै एकोऽङ्कः ।
- वाक्यपूर्णतायै अङ्कद्वयम् ।

**प्रश्नः - ५**

**अधोदत्तेषु वेदवेदाङ्गान् उपनिषदः च पट्टिकारूपेण विविच्य लिखत।**

(ऋक्, कठम्, निरुक्तम्, सामः, छन्दः, माण्डूक्यम्, शिक्षा, यजुः, व्याकरणम्, अथर्वः, ईशम्, तैत्तिरीयम्)

**पठनाधिगमः :-**

- आशयं भेदान् च ज्ञात्वा उचितरूपेण विवेचयति ।

**चिन्ताशेषयः :-**

- विवेचनम्, आशयावगमनं च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- ३

**मूल्यनिर्णयसूचकः :-**

- उचितस्य एकैकस्य उत्तरस्य कृते एकः अङ्कः ।

**उत्तरम् :-**

| वेदाः | वेदाङ्गाः | उपनिषदः |
| --- | --- | --- |
| ऋक्, सामः, यजुः, अथर्वः । | निरुक्तम्, छन्दः , शिक्षा, व्याकरणम् । | कठम्, माण्डूक्यम् ईशम्, तैत्तिरीयम् । |

SET - 1

**S. S. L.C. EXAMINATION, MARCH - 2017**

**SAMPLE QUESTION PAPER**

**SANSKRIT**

**First Language Part I Sanskrit- Paper -I**

**(For Academic and Oriental Sanskrit Schools )**

**Time - 1½ Hours** **Total Score - 40**

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

(क) **दीनवत्सला जननी** -इति पाठभागः महाभारतस्य कस्मात् पर्वात् उद्धृतः?
(भीष्मपर्वात्, वनपर्वात्, सभापर्वात्)

(ख) **स्वराज्यं मम जन्माधिकारः** - कस्य वचनमिदम्?
(डा.एस्.राधाकृष्णस्य, बालगङ्गाधरतिलकस्य, महात्मागान्धिनः)

(ग) **माघम्** इति प्रसिद्धं महाकाव्यं किम्?
(नैषधीयचरितम्, कुमारसम्भवम्, शिशुपालवधम्)

(घ) **उत्तिष्ठत जाग्रत!** .. इति प्रसिद्धं वाक्यं कस्यां उपनिषदि अन्तर्भवति?
(कठोपनिषदि, ईशावास्योपनिषदि, मुण्डकोपनिषदि)

**2. यथोचितं योजयत।** **(4x1=4)**

| | |
|---|---|
| (क) रागविशेषः | - वनस्पतिः । |
| (ख) कनकधारास्तवम् | - शरभोजिः। |
| (ग) पनसः | - महात्मागान्धी। |
| (घ) सत्यशोधनम् | - काम्बोजी। |
| | - श्रीशङ्करः। |

**3. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** (1x3=3)

सङ्गीतपठनाय आगता बालिका अध्यापिकां दृष्ट्वा प्रणम्य सविनयम् अवदत् -

' अहं सङ्गीतं पठितुम् इच्छामि ' इति।।

**4. पञ्चमहाकाव्यानि अधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत।** (1x5=5)

***सूचनाः-*** संस्कृतसाहित्यम् - कालिदासादयः महाकवयः - पञ्च महाकाव्यानि -

पुराणप्रसिद्धाः कथाः - सर्वेषु काव्येषु महत्तरम् ।

**5. पद्यं पठित्वा अस्य गद्यक्रमे रिक्तांशान् पूरयत।** (1x2=2)

अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनताया हृदयं च विस्मयैः।।

***गद्यक्रमः*** - अमुना ......... .........कमला तद्भवनं ......... ......... अपूरयत्।
विस्मयैः .........हृदयं च ।

**6. प्रादेशिकभाषया लिखत।** (1x5=5)

लोके सर्वे जनाः सुखमिच्छन्ति। सुखमनुभोक्तुं ते धनादीनां सम्पादनं कुर्वन्ति। यदा सर्वे स्वसुखाय एव यतन्ते तदा अन्येषां हानिरपि भवति। अतः काश्चन व्यवस्थाः अस्माकं पूर्विकैः निर्दिष्टाः। समस्तलोकस्य गुणोत्कर्षाय ते प्रार्थनां प्रवृत्तिं च अकुर्वन्।

**7. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (4x1=4)

स्वदेशविषये निस्वार्थस्नेहः एव देशभक्तिः। स्वप्राणान् अपि त्यक्त्वा देशभक्ताः जनाः देशरक्षां कुर्वन्ति। अस्माकं भारतं देशभक्तानाम् अनेकानां जनानां जन्मभूमिरस्ति। स्वातन्त्र्यसमरकाले बहवः जनाः स्वदेशस्य कृते स्वप्राणान् त्यजन्ति स्म। तेषां महात्मनां चरितम् अनुकरणीयमेव।

(क) देशभक्तिः नाम का?

(ख) अनुकर्तुं योग्यम् - इत्यर्थकं पदं चित्वा लिखत।

(ग) देशरक्षायै जनाः किं त्यजन्ति?

(घ) अधो रेखाङ्कितपदस्य सन्धिं विश्लेषयत।

**8. कोष्ठकात् शतृ-शानजन्तरूपाणि विविच्य पट्टिकां लिखत।** (3x1=3)

( पचन् , नुद्यमानः , प्रेरयन् , कम्पमानः, वन्दमानः, धावन् )

9. **कथाभागं पठित्वा सम्भाषणांशान् पूरयत।** **(4x1=4)**

***कथांशः*** - कश्चित् शृगालः अजमांसं भोक्तुम् अभिलषति स्म। सः पत्नीमाहूय अजाम् आनेतुम् उपायं चिन्तितवान्।

शृगालः - प्रिये! अहम् ..................खादितुम् इच्छामि।

शृगालपत्नी - किमहं करिष्ये?

शृगालः - कमपि ....................चिन्तयतु।

शृगालपत्नी - एका ................ अत्र समीपे गृहे अस्ति।

शृगालः - एवं चेत् ताम् अजाम् उपायेन आनयतु।

शृगालपत्नी - अस्तु । अहं मित्रभावेन ताम् आनयामि।

शृगालः - ..................................।

10 . **उदाहरणानुसारं सन्धत्त।** **(1x1=1)**

***उदा-*** *झटिति + एव - झटित्येव ।*

इति + एव - ........... ।

11. **उदाहरणानुसारम् एकपदं लिखत।** **(1x1=1)**

***उदा-*** *देवः च असौ ऋषिः च - देवर्षिः ।*

महान् च असौ ऋषिः च- ....................... ।

12 . **उदाहरणानुसारं वाक्यं परिवर्तयत ।** **(1x1=1)**

***उदा-*** *सः शरीरेण दुर्बलः। मनसा शक्तः भवति। (यद्यपि - तथापि)*

*यद्यपि सः शरीरेण दुर्बलः तथापि मनसा शक्तः भवति।*

वर्षाकालः समागतः । वृष्टिः नास्ति। (यद्यपि - तथापि)

13. . **अधोदत्तात् वाक्यात् सम्बोधनारूपं चित्वा लिखत ।** **(1x1=1)**

मुनिवाक्यं श्रुत्वा हरिश्चन्द्रः ' भो मुने! भवतः कारुण्येन अहं सर्वं करोमि ' इति प्रत्यवदच्च।

14. **द्वयोः औषधसस्ययोः नाम गुणं च लिखत।** **(2x1=2)**

*** *** ***

**S. S. L.C. EXAMINATION, MARCH - 2017** **SET - 1**

**SAMPLE QUESTION PAPER**

**ANSWER KEY**

**SANSKRIT**

**First Language Part I Sanskrit- Paper -I**

**(For Academic and Oriental Sanskrit Schools )**

**Total score - 40**

---

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

(क) वनपर्वात् ।

(ख) बालगङ्गाधरतिलकस्य ।

(ग) शिशुपालवधम् ।

(घ) कठोपनिषदि ।

**2. यथोचितं योजयत।** **(4x1=4)**

(क) रागविशेषः - काम्बोजी।

(ख) कनकधारास्तवम् - श्रीशङ्करः।

(ग) पनसः - वनस्पतिः ।

(घ) सत्यशोधनम् - महात्मागान्धी।

**3. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** **(1x3=3)**

**क्त्वान्त-** दृष्ट्वा। **ल्यबन्त-** प्रणम्य । **तुमुन्नन्तम्** - पठितुम् ।

**4. पञ्चमहाकाव्यम् अधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत।** **(1x5=5)**

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णय सूचकाः**

- सूचनानुसारम् आशयस्वीकरणस्य कृते अङ्कद्वयम् ।
- वाक्यस्य पूर्णतायै अङ्कद्वयम् ।
- भाषाशुद्ध्यै एकोऽङ्कः ।

**5. पद्यं पठित्वा अस्य गद्यक्रमस्य रिक्तांशान् पूरयत।** **(1x2=2)**

उचितस्य गद्यक्रमस्य कृते पूर्णाङ्कः ।

**6. प्रादेशिकभाषया लिखत।** **(1x5=5)**

उचितस्य एकैकस्य वाक्यस्य अनूदनाय एकैकोऽङ्कः ।

**7. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **(4x1=4)**

(क) स्वदेशविषये निस्वार्थस्नेहः एव।
(ख) अनुकरणीयम् ।
(ग) देशरक्षार्थं जनाः स्वप्राणान् त्यजन्ति ।
(घ) जन्मभूमिः + अस्ति - जन्मभूमिरस्ति

**8. कोष्ठकात् शतृ-शानजन्तरूपाणि विविच्य पट्टिकां लिखत।** **(3x1=3)**

**शतृ-** नुद्यमानः, कम्पमानः, वन्दमानः । **शानच् -** प्रेरयन्, धावन्, पचन् ।

**9. कथाभागं पठित्वा सम्भाषणांशान् पूरयत।** **(4x1=4)**

उचितस्य एकैकस्य संम्भाषणपूरणस्य कृते एकैकोऽङ्कः ।

**10 . उदाहरणानुसारं सन्धत्त।** **(1x1=1)**

इति + एव - इत्येव।

**11. उदाहरणानुसारं एकपदं लिखत।** **(1x1=1)**

महान् च असौ ऋषिः च - महर्षिः ।

**12 . उदाहरणानुसारं वाक्यं परिवर्तयत।** **(1x1=1)**

यद्यपि वर्षाकालः समागतः तथापि वृष्टिः नास्ति।

**13. . अधोदत्तात् वाक्यात् सम्बोधनारूपं चित्वा लिखत ।** **(1x1=1)**

भो मुने!

**14. द्वयोः औषधसस्ययोः नाम गुणञ्च लिखत।** **(2x1=2)**

उचितस्य उत्तरस्य कृते एकैकोऽङ्कः।

*** *** ***

**SET - 1**

## S. S. L.C. EXAMINATION , MARCH - 2017
## SAMPLE QUESTION PAPER - BLUE PRINT
## SANSKRIT
### First Language Part I Sanskrit- Paper -I
### (For Academic and Oriental Sanskrit Schools )

### BLUE PRINT
### प्रश्नविशकलनरूपरेखा

| क्रमसंख्या | एककम् | वस्तुनिष्ठम् | | विवरणम् | | आहत्य | |
|---|---|---|---|---|---|---|---|
| | | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः |
| १ | जीवनम् | 2(2) | 2 | 4 | 11 | 6 | 13 |
| २ | पैतृकम् | (4) | 4 | 2 | 3 | 2 | 7 |
| ३ | साहिती | (1) | 1 | 4 | 10 | 4 | 11 |
| ४ | संस्कृतिः | (1) | 1 | 2 | 8 | 2 | 9 |
| | आहत्य | **2** | **8** | **12** | **32** | **14** | **40** |

## WEIGHTAGE TO TYPE OF QUESTIONS

## प्रश्नानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | प्रश्नरूपाणि | प्रश्नसंख्या | आङ्काः | प्रतिशतम् |
|---|---|---|---|---|
| १ | वस्तुनिष्ठम् | 2 | 8 | 20 % |
| २ | विवरणम् | 12 | 32 | 80% |
| | **आहत्य** | **14** | **40** | **100%** |

## WEIGHTAGE TO UNITS

## एककानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | एककम् | अङ्काः | प्रतिशतम् |
|---|---|---|---|
| १ | जीवनम् । | 13 | 32.5% |
| २ | पैतृकम् । | 7 | 17.5% |
| ३ | साहिती । | 11 | 27.5% |
| ४ | संस्कृतिः। | 9 | 22.5% |
| **आहत्य** | | **40** | **100%** |

**SET - 1**

## S. S. L .C. EXAMINATION , MARCH - 2017

## SAMPLE QUESTION PAPER - QUESTION WISE ANALYSIS

## SANSKRIT

### First Language Part I Sanskrit- Paper -I

### (For Academic and Oriental Sanskrit Schools )

**Time - 1½ Hours** **Total Score - 40**

| प्रश्नसंख्या | एककम् | पठनाधिगमः | चिन्ताशेषयः | प्रश्नमातृका | अङ्कः | समयः |
|---|---|---|---|---|---|---|
| १ | जीवनम्<br>पैतृकम्<br>साहिती<br>संस्कृतिः | आशयं ज्ञात्वा उचितपदानि निर्धारयति । | आशयावगमनम्<br>विवेचनम्<br>निर्धारणम् | वस्तुनिष्ठम् | १<br>१<br>१<br>१ | ५ |
| २ | पैतृकम्<br>जीवनम् | आशयं ज्ञात्वा उचितपदानि योजयति। | आशयग्रहणम्<br>विवेचनम् | वस्तुनिष्ठम् | ३<br>१ | ५ |
| ३ | साहिती | अव्ययपदानि विविच्यलिखति। | विवेचनम्<br>प्रयोगः | विवरणम् | ३ | ५ |
| ४ | साहिती | आशयं ज्ञात्वा टिप्पणीं लिखति। | आशयावगमनम्।<br>प्रयोगः । | विवरणम् | ५ | १५ |
| ५ | पैतृकम् | आशयं ज्ञात्वा गद्यक्रमं लिखति। | आशयावगमनम्।<br>प्रयोगः । | विवरणम् | २ | ५ |
| ६ | जीवनम् | आशयं ज्ञात्वा विवर्तयति । | आशयावगमनम्<br>प्रयोगः । | विवरणम् | ५ | १५ |

| | | | | | | |
|---|---|---|---|---|---|---|
| ७ | संस्कृतिः | खण्डिकां पठित्वा भाषासविशेषतां आशयं च अवगच्छति । | आशयावगमनम् प्रयोगः । | विवरणम् | ४ | १० |
| ८ | जीवनम् | विशेषण- -विशेष्य पदं ज्ञात्वा पट्टिकां रचयति । | आशयावगमनम् प्रयोगः | विवरणम् | ३ | ५ |
| ९ | संस्कृतिः | संम्भाषणं संभाव्य लिखति। | आशयावगमनम् प्रयोगः | विवरणम् | ४ | १० |
| १० | पैतृकम् | पदं संयोजयति। | प्रयोगः | विवरणम् | १ | २ |
| ११ | साहिती | एकपदं लिखति। | प्रयोगः | विवरणम् | १ | २ |
| १२ | जीवनम् | वाक्यम् योजयति | प्रयोगः | विवरणम् | १ | ३ |
| १३ | साहिती | सम्बोधनारूपं विविच्य लिखति | प्रयोगः | विवरणम् | १ | ३ |
| १४ | जीवनम् | आशयं ज्ञात्वा लघुटिप्पणीं लिखति । | आशयावगमनम् प्रयोगः | विवरणम् | २ | ५ |

SET - II

**S. S. L.C. EXAMINATION , MARCH - 2017**

**SAMPLE QUESTION PAPER**

**SANSKRIT**

**First Language Part I Sanskrit- Paper -I**

**(For Academic and Oriental Sanskrit Schools )**

**Time - 1½ Hours** **Total Score - 40**

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1 कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

क) कः गणे न अन्तर्भवति?

(ऋषभः, रासभः, वृषभः)

ख) वृक्षायुर्वेदस्य कर्ता कः?

(सुरपालः, चरकः, वाग्भटः )

ग) कस्य पूर्वजन्मकथाम् अवलम्ब्य जातककथाः विरचिताः ?

( श्रीबुद्धस्य, यशुदेवस्य, शङ्कराचार्यस्य)

घ) विद्वदौषधम् इति प्रसिद्धं काव्यं किम् ?

(नैषधम्, शिशुपालवधम्, किरातार्जुनीयम्)

**2. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** **(3x1=3)**

काकः जलपात्रस्य समीपम् आगत्य तस्मिन् अल्पमात्रं जलं दृष्ट्वा पाषाणखण्डानां निक्षेपणं कर्तुम् इच्छति स्म।

**3. यथोचितं पट्टिकां पूरयत।** **(4x1=4)**

| कृतीनां नाम | विभागः | कर्ता |
|---|---|---|
| महाभारतम् | इतिहासः | .............. । |
| अभिज्ञानशाकुन्तलम् | .............. | कालिदासः । |
| ..................... | कथा | विष्णुशर्मा । |
| शङ्करदिग्विजयम् | महाकाव्यम् | ................ । |

**4. सर्वदमनस्य स्वभावमधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत।** **(1x5=5)**

***सूचना-*** सिंहशिशुम् — क्रीडनकम्— मृत्तिकामयूरम् — तापसी — राजा — मातृस्मरणा।

**5. भोजनकाले क्रोधादीन् विहाय स्वस्थः भवेत् - इति आशयप्रतिपादकं श्लोकं चित्वा लिखत।**

**(1x2=2)**

क) शरीरमेवायतनं सुखस्य
दुःखस्य चाप्यायतनं शरीरम् ।
यद्यच्छरीरेण करोति कर्म
तेनैव देही समुपाश्नुते तत् ।।

ख) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति ।।

**6 प्रादेशिकभाषया लिखत।** **(1x5=5)**

मलयालचलनचित्रेषु संस्कृतगानानामपि महत्तरं स्थानं भवति। तेषु प्रसिद्धमस्ति ' **जानकीजाने** '- इति संस्कृतगानम्। गानमिदं प्रसिद्धकविना यूसफलि केच्चेरि महाशयेन विरचितमस्ति। मलयालगानमिव सर्वे जनाः संस्कृतगानमपि स्वीकुर्वन्ति। अतः अनेकानि संस्कृतगानानि इदानीं चलनचित्रेषु प्रचलन्ति।

**7 श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **(4x1=4)**

एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि
गणयामास पार्वती ।।

(क) पार्वती कानि गणयामास ?
(ख) अवनतमुखी- इत्यर्थकं पदं चित्वा लिखत।
(ग) अस्मिन् श्लोके क्रियापदं किम् ?
(घ) अधो रेखाङ्कितपदस्य सन्धिं विश्लेषयत।

**8 ' ऋते ' उपयुज्य उदाहरणानुसारं वाक्यं परिवर्तयत।** **(1x1=1)**

उदा- वने सिंहः नास्ति। अन्ये मृगाः सन्ति।

वने सिंहात् ऋते अन्ये मृगाः सन्ति।।

क) अद्य आकाशे चन्द्रः नास्ति। सर्वत्र तारागणाः सन्ति।

**9. काचित् बालिका ग्रन्थशालां गच्छति। मार्गमध्ये सा अध्यापिकाम् अपश्यत्। तयोः मिथो भाषणे रिक्तांशान् पूरयत।** **(4x1=4)**

बालिका - नमस्ते! आचार्ये!

अध्यापिका - नमस्ते! ..........................?

बालिका - अहं .......... गच्छामि।

अध्यापिका - पुस्तकं स्वीकर्तुं वा ?

बालिका - आम्, मम .................ग्रन्थस्य आवश्यकता भवति।

अध्यापिका - सुरपालस्य वा ?

बालिका - आम्। सुरपालस्य एव।

अध्यापिका - मम गृहं आगच्छतु। अहं पुस्तकं .........।।

**10. उदाहरणानुसारं सन्धत्त।** **(1x1=1)**

***उदा-*** ओषधिः + च - ओषधिश्च।

ततः + च - ........... ।

**11. उदाहरणानुसारं एकपदं लिखत।** **(1x1=1)**

***उदा-*** पर्वतस्य अपत्यं स्त्री - पार्वती।

जनकस्य अपत्यं स्त्री - ....................... ।

**12. सूचनानुसारं जीवनचरितं लिखत।** **(1x4=4)**

| | | |
|---|---|---|
| नाम | - | कुमारनाशान्। |
| जीवितकालः | - | १८९३ - १९२४ |
| प्रवृत्तिमण्डलः | - | कविः, सामाजिकः, तत्वज्ञानी, निरूपकः। |
| प्रधानकृतयः | - | वीणपूव्, प्ररोदनम्, नलिनी, करुणा, दुरवस्था। |
| पुरस्कारः | - | वेयिल्स् राजकुमारेण वीरशृङ्खला सम्मानिता। |

**13. अधोदत्ताद् वाक्यात् सम्बोधनारूपं चित्वा लिखत।** **(1x1=1)**

बाले! भवत्याः सत्यनिष्ठां दृष्ट्वा अहं सन्तुष्टोऽस्मि- गान्धिमाहाभागः ताम् अवदत्।

**14. उदाहरणानुसारम् अधोदत्तं वाक्यं परिवर्त्य लिखत ।** **(1x1=1)**

उदा :- कृषकः धेनुं बहुवारं **ताडयति** ।

कृषकः धेनुं बहुवारम् **अताडयत्** ।

१) सुराधिपः सुरभिं पृच्छति।

सुराधिपः सुरभिम् ............. ।

**** ****

SET - II

## S. S. L. C. EXAMINATION, MARCH - 2017
## SAMPLE QUESTION PAPER - ANSWER KEY
## SANSKRIT
### First Language Part I Sanskrit- Paper -I
(For Academic and Oriental Sanskrit Schools)

Time - 1½ Hours | Total Score - 40

**1 कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** (4x1=4)

क) रासभः।

ख) सुरपालः।

ग) श्रीबुद्धस्य ।

घ) नैषधम् ।

**2. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** (3x1=3)

**ल्यबन्तम्** - आगत्य । **क्त्वान्तम्** - दृष्ट्वा । **तुमुन्नन्तम्** - कर्तुम् ।

**3. यथोचितं पट्टिकां पूरयत।** (4x1=1)

| कृतीनां नाम | विभागः | कर्ता |
|---|---|---|
| महाभारतम् | इतिहासः | व्यासः । |
| अभिज्ञानशाकुन्तलम् | नाटकम् | कालिदासः । |
| पञ्चतन्त्रम् | कथा | विष्णुशर्मा । |
| शङ्करदिग्विजयम् | महाकाव्यम् | माधवविद्यारण्यस्वामी । |

**4. सर्वदमनस्य स्वभावमधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत।** (1x5=5)

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णयसूचकाः :-**

- सूचनानुसारम् आशयस्वीकरणम् ।
- वाक्यस्य पूर्णता ।
- भाषाशुद्धिः ।

**5. भोजनकाले क्रोधादीन् विहाय स्वस्थः भवेत् - इति आशयप्रतिपादकं श्लोकं चित्वा लिखत।** (1x2=2)

ख) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति ।।

**6 प्रादेशिकभाषया लिखत।** **(1x5=5)**

उचितस्य एकैकस्य वाक्यस्य अनूदनाय एकैकोऽङ्कः ।

**7 श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **(4x1=4)**

(क) पार्वती लीलाकमलपत्राणि गणयामास।

(ख) अधोमुखी।

(ग) गणयामास ।

(घ) पितुः + अधोमुखी - पितुरधोमुखी।

**8 'ऋते ' उपयुज्य उदाहरणानुसारं वाक्यं परिवर्तयत।** **(1x1=1)**

क) अद्य आकाशे चन्द्राद् ऋते सर्वत्र तारागणाः सन्ति।

**9. काचित् बालिका ग्रन्थशालां गच्छति। मार्गमध्ये सा अध्यापिकाम् अपश्यत्।तयोः मिथो भाषणे रिक्तांशान् पूरयत।** **(4x1=4)**

उचितस्य एकैकस्य संम्भाषणपूरणस्य कृते एकैकोऽङ्कः ।

**10. उदाहरणानुसारं सन्धत्त।** **(1x1=1)**

ततः + च - ततश्च ।

**11. उदाहरणानुसारं एकपदं लिखत।** **(1x1=1)**

जनकस्य अपत्यं स्त्री - जानकी ।

**12. सूचनानुसारं जीवनचरितं लिखत।** **(1x4=4)**

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णयसूचकाः :-**

- सूचनानुसारम् आशयस्वीकरणम् ।
- जीवनचरितस्य घटना।
- भाषाशुद्धिः ।

**13. अधोदत्ताद् वाक्यात् सम्बोधनारूपं चित्वा लिखत।** **(1x1=1)**

बाले!

**14. उदाहरणानुसारम् अधोदत्तं वाक्यं परिवर्त्य लिखत।** **(1x1=1)**

सुराधिपः सुरभिम् अपृच्छत् ।

**** ****

SET - II

## S. S. L.C. EXAMINATION, MARCH - 2017

## SAMPLE QUESTION PAPER - BLUE PRINT

## SANSKRIT

### First Language Part I Sanskrit- Paper -I

(For Academic and Oriental Sanskrit Schools )

### BLUE PRINT

### प्रश्नविशकलन रूपरेखा

| क्रमसंख्या | एककम् | वस्तुनिष्ठम् | | विवरणम् | | आहत्य | |
|---|---|---|---|---|---|---|---|
| | | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः |
| १ | जीवनम् । | 2 | 3 | 3 | 4 | 5 | 7 |
| २ | पैतृकम् । | * | 1 | 3 | 10 | 3 | 11 |
| ३ | साहिती । | * | 2 | 5 | 14 | 5 | 16 |
| ४ | संस्कृतिः । | * | 2 | 1 | 4 | 1 | 6 |
| | **आहत्य** | **2** | **8** | **12** | **32** | **14** | **40** |

## WEIGHTAGE TO TYPE OF QUESTIONS

## प्रश्नानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | प्रश्नरूपाणि | प्रश्नसंख्या | अङ्काः | प्रतिशतम् |
|---|---|---|---|---|
| १ | वस्तुनिष्ठम् | 2 | 8 | 20 % |
| २ | विवरणम् | 12 | 32 | 80% |
| | **आहत्य** | **14** | **40** | **100%** |

## WEIGHTAGE TO UNITS

## एककानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | एककम् | अङ्काः | प्रतिशतम् |
|---|---|---|---|
| १ | जीवनम् । | 7 | 17.5% |
| २ | पैतृकम् । | 11 | 27.5% |
| ३ | साहिती । | 16 | 40.0% |
| ४ | संस्कृतिः । | 6 | 15.0% |
| **आहत्य** | | **40** | **100%** |

SET - II

## S. S. L. C. EXAMINATION, MARCH - 2017
## SAMPLE QUESTION PAPER - QUESTION WISE ANALYSIS
## SANSKRIT
### First Language Part I Sanskrit- Paper -I
### (For Academic and Oriental Sanskrit Schools )

Time - 1½ Hours | Total Score - 40

| प्रश्नसंख्या | एककम् | पठनाधिगमः | चिन्ताशेषयः | प्रश्नमातृका | अङ्कः | समयः |
|---|---|---|---|---|---|---|
| १ | जीवनम्<br>जीवनम्<br>संस्कृतिः<br>साहिती | आशयं ज्ञात्वा उचितपदानि निर्धारयति । | आशयावगमनम् विवेचनम् निर्धारणम् च | वस्तुनिष्ठम् | १<br>१<br>१<br>१ | ५ |
| २ | जीवनम्<br>साहिती<br>संस्कृतिः<br>पैतृकम् | आशयं ज्ञात्वा उचितपदानि योजयति । | आशयावगमनम् विवेचनम् च । | वस्तुनिष्ठम् | १<br>१<br>१<br>१ | ५ |
| ३ | साहिती | अव्ययपदानि विविच्यलिखति। | विवेचनम् प्रयोगः च। | विवरणा--त्मकम् | ३ | ५ |
| ४ | साहिती | आशयंस्वीकृत्य टिप्पणीं लिखति। | आशयावगमनम् प्रयोगः च। | विवरणम् | ५ | १५ |
| ५ | जीवनम् | आशयंज्ञात्वा श्लोकं विवेचयति | आशयावगमनम् भाषाप्रयोगः च। | विवरणम् | २ | ५ |
| ६ | पैतृकम् | आशयंज्ञात्वा विवर्तयति । | आशयावगमनम् प्रयोगः च। | विवरणम् | ५ | १५ |

| | | | | | | |
|---|---|---|---|---|---|---|
| ७ | साहिती | श्लोकं पठित्वा आशयमवगच्छति | आशयावगमनम् प्रयोगः च। | विवरणम् | ४ | १० |
| ८ | पैतृकम् | वाक्यानि योजयति | प्रयोगः | विवरणम् | १ | २ |
| ९ | संस्कृतिः | सम्भाषणं संभाव्य लिखति | आशयावगमनम् प्रयोगः च। | विवरणम् | ४ | १० |
| १० | जीवनम् | सन्धत्ते | प्रयोगः | विवरणम् | १ | २ |
| ११ | साहिती | एकपदं लिखति | प्रयोगः | विवरणम् | १ | २ |
| १२ | पैतृकम् | जीवनचरितम् लिखति | आशयावगमनम् प्रयोगः च। | विवरणम् | ४ | १० |
| १३ | साहिती | सम्बोधनारूपं लिखति | प्रयोगः | विवरणम् | १ | २ |
| १४ | जीवनम् | लङ् रूपं लिखति | प्रयोगः | विवरणम् | २ | २ |

**First Terminal Evaluation -2016**
**First Language Part I-SANSKRIT-Paper-I**
**पादवार्षिकमूल्यनिर्णयः २०१६**
**संस्कृतम्-Part -I**
**(अक्कादमिक-संस्कृतविद्यालयानां कृते)**
**(For Academic& Oriental Sanskrit Schools)**

**STD-X** | **Score:40**
**कक्ष्या- दशमी** | **Time:1½ Hours**

## निर्देशाः

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1.कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** (4x1=4)

१. सुखदुःखयोः कर्ता कः ?
(मनः, वाक्, आत्मा।)
२. वृक्षायुर्वेदः इति ग्रन्थस्य कर्ता कः?
(चरकः, वराहमिहिरः, सुरपालः।)
३. किं गणे न अन्तर्भवति?
(पचन्, वसन्, आसन्।)
४. द्रुमः इत्यर्थकं पदं किम्?
(पुत्रः, सुरः, वृक्षः।)

**2. यथोचितं योजयत।** (4x1=4)

| | |
|---|---|
| १. शङ्करदिग्विजयम् | सर्वविषहारिणी । |
| २. बलीवर्दः | माधवविद्यारण्यस्वामी । |
| ३. वृक्षायुर्वेदः | ऋषभः । |
| ४. हरिद्रा | तरुमहिमा। |

3. "मानवः शरीरेण यत् कर्म करोति तस्य कर्मणः फलं स्वशरीरेणैव उपभुज्यते" इत्याशयप्रतिपादकं श्लोकं निर्धार्य लिखत। (2)

शरीरमेवायतनं सुखस्य
दुःखस्य चाप्यायतनं शरीरम्।
यद्यच्छरीरेण करोति कर्म
तेनैव देही समुपाश्नुते तत्।।

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।।

4. "सस्यसंरक्षणम्" इति विषये मुद्रावाक्यानि रचयत। (3)

5. सन्दर्भमिमं पठित्वा सुरभेः इन्द्रस्य च भाषणं संभाव्य लिखत। (4x1=4)

कृषकेण ताडितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि प्रवहन्ति स्म। सुरभेः इमामवस्थां दृष्ट्वा सुराधिपः देवेन्द्रः कारणमपृच्छत्। तस्याः पुत्रः दीनः इति जानन्नपि कृषकः तं ताडयति इति सा अकथयत्। 'गच्छ वत्से! सर्वं भद्रं जायेत' इति इन्द्रः समाश्वासवचनम् अदात्।

इन्द्रः - ......................
सुरभिः - ....................
इन्द्रः - .....................
सुरभिः - .....................

6. सूचनानुसारं सस्यप्रभेदान् अधिकृत्य लघूपन्यासं लिखत। (5)

सूचनाः - वृक्षायुर्वेदः, फलात्पूर्वं पुष्पाणि, अव्यक्तपुष्पः, प्रतानैः प्रसारिता, फलपाकान्ता ओषधिः, उदाहरणानि ।

**7. उदाहरणानुसारं वाक्यं परिवर्तयत।** (2)

**उदा** : परीक्षा नास्ति। सः पठति।

यद्यपि परीक्षा नास्ति तथापि सः पठति।

**वर्षाकालः समागतः। वृष्टिः नास्ति।**

————————————।

**8. शतृ- शानजन्तरूपाणि विविच्य पट्टिकां रचयत।** (4)

**नुद्यमानः, प्रेरयन्, पठन्, वन्दमानः , गच्छन्, कम्पमानः, रुदन्, गम्यमानः ।**

**9. खण्डिकां पठित्वा अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखत।** (4x1=4)

महाकविना बाणभट्टेन विरचितं गद्यकाव्यं भवति कादम्बरी। दीर्घसमस्तपदैः उत्तमवर्णनासौष्ठवैः च घटितमिदं काव्यम्। अत एव गद्यकाव्यविभागेषु अस्य प्रमुखं स्थानं लब्धम्। "गद्यं कवीनां निकषं वदन्ति" इति वचनं बाणभट्टस्य प्रावीण्यं व्यञ्जयति। "कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते" इति प्रथा अस्य काव्यस्य महत्वम् उद्घोषयति।

(निकषम् - ഉരകല്ല് /ചാണക്കല്ല് )

१. कादम्बरीग्रन्थस्य कर्ता कः?

२. सामर्थ्यम् इत्यर्थे खण्डिकायां प्रयुक्तं पदं किम्?

३. कादम्बरीकाव्यमधिकृत्य प्रचलिता प्रथा का?

४. आहारोऽपि - पदमिदं विश्लेषयत ——+ ——।

**10. उदाहरणानुसारं लिखत।** (1)

देही- देहः अस्य अस्तीति ।

**गुणी** - ————।

**11. व्यायाममहत्वप्रतिपादकं किमपि सुभाषितं लिखत।** (2)

**12. प्रादेशिकभाषया विवर्तयत।** (5)

कविगुलगुरुकालिदासप्रणीतं महाकाव्यं भवति रघुवंशम्। सूर्यवंशराजानां चरित्रमेव रघुवंशमहाकाव्यस्य प्रतिपाद्यविषयः। महाकाव्येऽस्मिन् एकोनविंशति सर्गाः सन्ति। कालिदासस्य उपमालङ्कारप्रयोगसामर्थ्यम् अस्मिन् काव्ये द्रष्टुं शक्यते। कालिदासस्य प्रकृतिवर्णनापाटवम् अनुपममेव।

◆ ◆ ◆

STD X Answer Key Score : 40

कक्ष्या - दशमी उत्तरसूचकाः

| प्रश्नसंख्या | मुल्यनिर्णयसूचकाः | अङ्क विशदांशः | आहत्य |
|---|---|---|---|
| 1. | आत्मा, सुरपालः, आसन्, वृक्षः। | 4x1 | 4 |
| 2. | शङ्करदिग्विजयम्-माधवविद्यारण्यस्वामी, बालीवर्दः - ऋषभः, वृक्षायुर्वेदः - तरुमहिमा, हरिद्रा - सर्वविषहारिणी | 4x1 | 4 |
| 3. | उचितश्लोकचयनाय - शरीरमेवायतनं .........तत् । | 2 | 2 |
| 4. | मुद्रावाक्यानि त्रीणि उचितरीत्या लिखितानि चेत् | 1x3 | 3 |
| 5. | (सम्भाषणं) आशयग्रहणाय 2 संभाषणस्य संभाव्यलेखनाय | 2 | 4 |
| 6. | सूचनाः सम्यक् उपयुज्यन्ते चेत् 2,आशयव्यक्तता 2, भाषाप्रयोगः। | 1 | 5 |
| 7. | उचितरीत्या वाक्ययोजनाय | 2 | 2 |
| 8. | शतृप्रत्ययान्तरूपचयनाय 2 शानच् प्रत्ययान्तरूपचयनाय2 | | 4 |
| 9. | प्रश्नस्य उत्तरलेखनाय एकैकोङ्कः । | 4x1 | 4 |
| 10. | विग्रहवाक्यं लिखति चेत्। | 1 | 1 |
| 11. | निर्दिष्टविषयश्लोकलेखनाय । | 2 | 2 |
| 12. | एकैकस्य वाक्यस्य विवर्तनाय एकैकोङ्कः । | 5x1 | 5 |
| | | | 40 |

## Second Terminal Evaluation-2016

**First Language Part I - Paper -I**

**SANSKRIT**

**(For Academic and Oriental Sanskrit Schools )**

**Class -X**

**Time - 1½ Hours** **Total Score - 40**

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

क) "**स्वराज्यम् अस्माकं जन्माधिकारः**" - कस्य वचनमिदम् ?
(बालगङ्गाधरतिलकस्य, महात्मागान्धिनः, डा. एस्. राधाकृष्णस्य)

ख) त्यागराजस्वामिना सह मैत्रीमुपगतः तञ्चावूर्देशाधिपः कः ?
(गोविन्दमारार् , शरभोजी, शार्ङ्गदेवः)

ग) नैषधीयचरिते नायिका का ?
( पार्वती, दमयन्ती, पाञ्चाली)

घ) भारविः कस्मिन् विषये प्रसिद्धः भवति ?
( उपमाप्रयोगे, पदलालित्ये, अर्थगौरवे )

**2. यथोचितं योजयत।** **(4x1=4)**

क) सामजवरगमना - बालगङ्गाधरतिलकः।

ख) गिरिशः - ईशोपदेशः।

ग) गिरिप्रभाषणम् - परमेश्वरः ।

घ) गीतारहस्यम् - त्यागराजस्वामी।

3. **अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** (1x3=3)

राजप्रशस्तिपरां कृतिमेकं विरच्य समर्पयति चेत् बहु धनं प्रदातुं राजा सज्जः इति दूतः त्यागराजसमीपं गत्वा अवदत् ।

4. **दुष्यन्तम् अधिकृत्य सूचनानुसारं स्वभावनिरूपणं लिखत।** (1x4=4)

***सूचना-*** दुष्यन्तः ...... अभिज्ञानशाकुन्तलं नाटकं ...... नायकः...... पुत्रदर्शनं ......

शकुन्तलादर्शनम् ...... प्रत्यभिज्ञानम् ......।

5. **श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।** (5x1=5)

<u>**वाच्यस्त्वया**</u> मद्वचनात् स राजा  
वह्नौ विशुद्धामपि यत्समक्षम्।  
मां लोकवादश्रवणादहासीः  
श्रुतस्य किं तत्सदृशं कुलस्य।।

क) कस्मात् कारणात् माम् अहासीः ?

ख) अग्निः इत्यर्थकं पदं श्लोकात् चित्वा लिखत।

ग) अस्मिन् श्लोके क्रियापदं किम् ?

घ) श्लोके रेखाङ्कितपदस्य सन्धिच्छेदं लिखत।

ङ) 'अक्ष्णोः समीपम्' इति पदयोः समस्तरूपं श्लोकात् चित्वा लिखत।

6. **सूचनानुसारं ' यदा - तदा ' उपयुज्य वाक्यं परिवर्तयत।** (2x1=2)

**उदा -** मेघवर्षः अजायत। मयूराः नृत्तम् अकुर्वन्।

यदा मेघवर्षः अजायत तदा मयूराः नृत्तम् अकुर्वन्।

क) गानालापनं समाप्तम्। जनाः करघोषम् अकुर्वन्।

7 . **उदाहरणानुसारं सन्धिच्छेदं लिखत।** (1x1=1)

**उदा-** कार्याणि + अपि - कार्याण्यपि ।

क) इत्यपि - ........... + ........ ।

8 **सम्भाषणांशान् पूरयत।** (4x1=4)

माधवः - नमस्ते रमेश ! भवान् किं पठति ?

रमेशः - ........................................... महाकाव्यम्।

माधवः - क्रिस्तुभागवतमहाकाव्यं वा ? इदं केन विरचितम् ?

रमेशः - ........................................ विरचितम् ।

माधवः - ........................................ ?

रमेशः - काव्ये ३३ सर्गाः सन्ति।

माधवः - ........................................ ?

रमेशः - श्वः इदं काव्यं अधिकृत्य सङ्गोष्ठी भविष्यति।

**9. प्रादेशिकभाषया लिखत।** **(1 x 5 = 5)**

मानवजीवने शुचित्वस्य प्रथमं स्थानम् अस्ति। आरोग्यपरिपालनाय बाह्याभ्यन्तरशुचित्वं अपेक्षितमेव। शरीरशुचित्वं परिसरशुचित्वं च बाह्यशुचित्वे अन्तर्भवतः। आन्तरिकशुचित्वे मनश्शुचित्वस्य अतीवप्राधान्यं वर्तते। मनश्शुचित्वं तु सुचिन्ताभिः समार्जनीयम् ।

**10. उदाहरणानुसारम् एकपदं लिखत।** **(1x1=1)**

*उदा-* राष्ट्रपिता - राष्ट्रस्य पिता ।

क) राष्ट्रपतिः - .....................।

**11 . सूचनानुसारं जीवचरित्रं लिखत ।** **(1x5=5)**

नाम - स्वातितिरुनाल्

जन्म - 1813 एप्रिल् 13

पितरौ - राजराजवर्मा वलियकोयित्तम्पुरान् राणी गौरीलक्ष्मीबाई च।

कर्ममण्डलम् - प्रजापालनम् संगीतम् च ।

प्रशस्तिः - गर्भश्रीमान्।

कृतयः - रागमालिकास्वरजतिः नवरात्रिकीर्तनानि च।

देहवियोगः - 1846 डिसम्बर् 27

12. **इतरेषां पुरतः भिक्षां मा ददातु। अन्यथा कुर्वन्तः कपटभक्ताः भवन्ति।**

**- इति आशययुक्तं श्लोकं चित्वा लिखत।** **(1x2=2)**

क) ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा।।

ख) भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।।

*** *** ***

## Second Terminal Evaluation-2016

First Language Part I - Paper - I

**SANSKRIT - ANSWER KEY**

**(For Academic and Oriental Sanskrit Schools)**

**Class -X** **Total Score - 40**

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

क) बालगङ्गाधरतिलकः । ख) शरभोजी ।

ग) दमयन्ती । घ) अर्थगौरवेण

**2. यथोचितं योजयत।** **(4x1=4)**

क) सामजवरगमना - त्यागराजस्वामी ।

ख) गिरिशः - परमेश्वरः ।

ग) गिरिप्रभाषणम् - ईशोपदेशः।

घ) गीतारहस्यम् - बालगङ्गाधरतिलकः।

**3. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** **(1x3=3)**

**ल्यबन्तम्** - विरच्य। **तुमुन्नन्तम्** - प्रदातुम् । **क्त्वान्तम्** - गत्वा ।

**4. दुष्यन्तम् अधिकृत्य सूचनानुसारं स्वभावनिरूपणं लिखत।** **(1x4=4)**

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः।

**मूल्यनिर्णयसूचकाः**

- सूचनानुसारम् आशयस्वीकरणाय अङ्कद्वयम् ।
- वाक्यस्य पूर्णतायै अङ्कद्वयम् ।
- भाषाशुद्ध्यै एकोऽङ्कः ।

**6. श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।** **(5x1=5)**

क) लोकवादश्रवणात् माम् अहासीः । ख) वह्नौ।

ग) अहासीः। घ) वाच्यः + त्वया ।

ङ) समक्षम् ।

**7. सूचनानुसारं यदा - तदा उपयुज्य वाक्यं परिवर्तयत।** **(2x1=2)**

क) यदा गानालापनं समाप्तं तदा जनाः करघोषम् अकुर्वन् ।

**8 . उदाहरणानुसारं सन्धत्त।** **(1x1=1)**

क) इत्यपि - इति + अपि ।

**9. सम्भाषणांशान् पूरयत।** (4x1=4)

उचितस्य एकैकस्य संम्भाषणपूरणस्य कृते एकैकोऽङ्कः ।

माधवः - नमस्ते रमेश ! भवान् किं पठति ?

रमेशः - क्रिस्तुभागवतमहाकाव्यम् अहं पठामि।

माधवः - क्रिस्तुभागवतमहाकाव्यं वा ? इदं केन विरचितम् ?

रमेशः - पि. सि. देवस्या महाभागेन विरचितम् ।

माधवः - काव्ये कति सर्गाः सन्ति ?

रमेशः - काव्ये ३३ सर्गाः सन्ति।

माधवः - किमर्थम् इदं महाकाव्यं पठति ?

रमेशः - श्वः इदं काव्यं अधिकृत्य सङ्गोष्ठी भविष्यति।

**5 प्रादेशिकभाषया लिखत।** (1x5=5)

उचितस्य एकैकस्य वाक्यस्य अनूदनाय एकैकोऽङ्कः ।

**10. उदाहरणानुसारम् एकपदं लिखत।** (1x1=1)

क) राष्ट्रपतिः - राष्ट्रस्य पतिः।

**11 . सूचनानुसारं जीवचरित्रं लिखत।** (1x5=5)

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णयसूचकाः**

- सूचनानुसारम् आशयस्वीकरणस्य कृते अङ्कद्वयम् ।
- वाक्यस्य पूर्णतायै अङ्कद्वयम् ।
- भाषाशुद्ध्यै एकोऽङ्कः ।

**12. इतरेषां पुरतः भिक्षां मा ददातु । अन्यथा कुर्वन्तः कपटभक्ताः भवन्ति ।**

**- इति आशययुक्तं श्लोकं चित्वा लिखत।** (1x2=2)

क) ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा।।

*** *** ***

# Second Terminal Evaluation-2016

First Language Part I - Paper -I

**SANSKRIT**

**BLUE PRINT**

**(For Academic and Oriental Sanskrit Schools )**

Class -X

## BLUE PRINT

## प्रश्नविशकलनरूपरेखा

| क्रमसंख्या | एककम् | वस्तुनिष्ठम् | | विवरणम् | | आहत्य | |
|---|---|---|---|---|---|---|---|
| | | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः |
| १ | पैतृकम् । | 1 | 4 | 4 | 10 | 5 | 14 |
| २ | साहिती। | 1 | 3 | 4 | 15 | 5 | 18 |
| ३ | संस्कृतिः। | * | 1 | 2 | 7 | 2 | 8 |
| | **आहत्य** | **2** | **8** | **10** | **32** | **12** | **40** |

## Second Terminal Evaluation-2016

### First Language Part I - Paper -I

### SANSKRIT

### BLUE PRINT

### (For Academic and Oriental Sanskrit Schools )

**Class -X**

#### WEIGHTAGE TO TYPE OF QUESTIONS

#### प्रश्नानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | प्रश्नरूपाणि | प्रश्नसंख्या | अङ्काः | प्रतिशतम् |
|---|---|---|---|---|
| १ | वस्तुनिष्ठम् | 2 | 8 | 20 % |
| २ | विवरणम् | 10 | 32 | 80% |
| | आहत्य | **12** | **40** | **100%** |

#### WEIGHTAGE TO UNITS

#### एककानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | एककम् | अङ्काः | प्रतिशतम् |
|---|---|---|---|
| २ | पैतृकम् | 14 | 35% |
| ३ | साहिती | 18 | 45% |
| ४ | संस्कृतिः | 8 | 20% |
| | आहत्य | **40** | **100%** |